एस्.जगन्नाथः। मैसूरु
jagannathas1956@gmail.com

दशदिशम्

४

२९.२.२०२०

दशस्वपि दिक्षु कटाक्षं पातयन्ती संस्कृतपत्रिका।

कथय जीवन ! तव रहस्यम्।

हर्षबाष्पविमोक्षकाले
रोदिषि त्वं निस्सृताश्रु।
प्रीतिसमये क्रोधकीलां
सृजसि बालिश जीवन!

अश्रुमोचनयोग्यसमये
हससि हासयसि त्वमन्यान्।
मरणकाले शिश्वसिषसि
प्रीतये केषां नृणाम् ?

नयनपथपतितेऽपि सिंहे
मुदितहृदयं गायसि त्वम्।
दृष्टसुमनोराशि वीक्षित-
भूतमिव हा, वेपसे ?

शान्तिपथमाक्रम्य कम्पित-
तीक्ष्णखड्गं भवसि घोरम्।
नर्तनोचितकालिकी तव
वद किमुचिता शिषयिषा ?

कथय जीवन! तव रहस्यं
वास्तवीमाकृतिमकपटाम्।
संशयेन विना ममास्तु
त्वयि सदा मैत्री परा।

~~~~~~

इङ्ग्लीष् विश्वभाषा कथमभवत् ?

'इङ्ग्लीष् कथं विश्वभाषाऽभवत्' इत्यस्य प्रश्नस्य उत्तरत्वेन यदुच्यते तत्र केचन हैत्वाभासाः प्रचलन्ति ;। यथा 'संस्कृतम् अमृतभाषेति कथमुच्यताम्' इत्यस्य प्रश्नस्योत्तरत्वेन 'गैर्वाण्या वाण्या' भक्तोत्तमैः।

'इङ्ग्लीष्भाषा जगति वर्तमानानां सर्वासामपि भाषाणां सर्वानपि शब्दानालिङ्गति। तस्मादेव इङ्ग्लीष्भाषा विश्वभाषा जाता !' एवं वदन्तो न पथि पथि भ्रमका ये केचन जनाः। किन्तु विश्वविद्यानिलयस्य प्रोफेसर्महाशयैरप्येवं विधीयते हेतूपन्यासः।

हंहो! कन्नडं विश्वभाषां विधातुं लब्ध इदानीं परमाद्भुत उपायः। मया कन्नडशब्दकोषो रच्यते यत्र स्क्याण्डिनेविया, बल्गेरिया, निहोन्(जपान्), फ्रान्स् तथा कोरियन्- एतेषु राष्ट्रेषु या भाषाः प्रचलन्ति ताभ्यः ५०० शब्दा आदीयन्ते योज्यन्ते च कोषेऽस्मिन्। झटिति तेषु राष्ट्रेषु कन्नडमधिकृता भाषा भविष्यति। अर्थात् एतेषु राष्ट्रेषु प्रजाः कन्नडभाषयैव संभाषिष्यन्ते !

'अस्माकं वादे कोऽस्ति दोषः ?आक्स्फोर्ड् इङ्ग्लीष् शब्दकोषे 'विष्णुः ब्रह्मा' इत्यादयः शब्दा दृश्यन्ते। एवं सति कथं त्वया अस्माकं वादस्य सोत्प्रासं प्रधूननं क्रियते' इति चेदित्थम्-

सम्यग् विचार्यतामेष विषयः। 'पात्रे तैलमित्युक्ते नेत्रे शूलम् इति वदति' इतिवदसंबद्धं किमपि नोच्यताम्। आक्स्फोर्ड् शब्दकोषे ब्रह्म विष्णुरित्यादिशब्दानां योजनमन्यत्, इङ्ग्लीष् भाषाया विश्वभाषात्वम् अन्यत्।

अवधीयतां सम्यगेतद् वस्तु। यस्मिन् कस्मिन्नपि विषये कश्चन ग्रन्थो मया रिरचयिषितः। रचयामि च। 'स्कूटर्वाहनस्य समीकरणम्' इत्यस्तु विषयः। रचिते च ग्रन्थे तद्ग्रन्थस्य क्रयणम् इच्छवः क्रीणन्ति, ये पुनरनिच्छवस्ते न क्रीणन्ति। इदमिङ्ग्लीष्-भाषाक्षेत्रे। अन्यभाषाणामपि क्षेत्रे।

संस्कृतभाषाक्षेत्रे सर्वमिदमतितमां भिन्नम्। केचन गीर्वाणवाणीभक्तिपूतहृदयाः संस्कृताभिमानिनस्तु ''पूर्वस्मिन् काले अस्माकं पूर्वजैः 'स्कूटर्शास्त्रं' रचितमासीत्। अहो बुद्धि-वैभवं तेषाम्'' इति सडिण्डिमनादं सतालं च गर्जन्ति!

गृह्यताम् अन्यदुदाहरणम्। गजविषयकं कुतूहलमस्ति कस्यचन जनस्य। अर्थात्, गजः कथमाहारं शुण्डया आदाय तुण्डे निदधाति, कथं स्वार्भकान् पालयति, कथं च स्वयूथ्यैः सह कलहायते, कथं च जले क्रीडति, कथं गजः केषाञ्चन विशिष्टानां सस्यपत्राणां भक्षणेन स्वस्यारोग्यं पालयति , गजस्य रोगे जाते रोगो जात इति कथं जानन्ति हस्तिपकाः, किमौषधं ते प्रयुञ्जति इत्यादिषु विषयेषु ज्ञानं प्रेप्सुः, तद्विषयकं च ग्रन्थं रिरचयिषुः वनं गच्छति, गजपालकैर्मिलति, तैः संभाषते निर्ज्ञातविषयः सन् तद्विषयकं ग्रन्थं लिखतीति स्थितिः। कुत्र ? संस्कृतेतरासु
~~~~~~

भाषासु।

अधुना दृश्यतां सांस्कृतं विश्वम्। ''-' गैर्वाण्या वाण्या' पालकाप्यमुनिना रचिते सति गजायुर्वेदे, किमन्यद् ज्ञातव्यम् ? तस्मिन् विषये सेमिनार् करणीयम्। तत्र च गजायुर्वेदमधिकृत्य पेपर् प्रेसेण्टेषन् मया क्रियते'। इत्येव वदन्ति विश्वविद्यानिलये सिंहासनारूढा राजानो राज्यश्च। 'गीर्वाणी(?)'साम्राज्ये सन्तुष्टासु प्रबन्धपठनमात्रविश्रान्तबुद्धिष्वेतासु प्रजासु, गजस्य शुण्डां स्पष्टवन्तो जनाः कतीति मम प्रश्नः।

''कश्चन विषयो मया ज्ञातः। तस्मिन् विषये ग्रन्थं रिरचयिषामि ; कस्मिंश्चन विषये मम किमपि न ज्ञातमथवा सामिज्ञानमस्ति-तस्मिन् विषये जिज्ञासुष्टिप्पण्यादिकं रचयित्वा ताष्टिप्पणीर्ग्रन्थात्मना परिणामयामि।'' पठितानि किमेतानि वाक्यानि ? एतानि स्वप्नेऽपि न श्रूयन्ते सांस्कृते जगति। एतानि कामं श्रूयन्ते इङ्ग्लीष्भाषाजगति। इङ्ग्लीष् च वर्धते वर्धते वर्धत एव। तदनुकृत्या भारतीयाः संस्कृतेतरा भाषा अपि सहस्रमुखवत्यः सहस्रबाहवः सहस्रपादाश्च भवन्त्यो दरीदृश्यन्ते। संस्कृतम्..?

केषाञ्चन संस्कृताभिमानो 'विश्वकोशानां' संस्कृत भाषायामस्तित्वमधिकृत्य प्रवर्तते। ''अग्निपुराण-गरुडपुराण-बृहत्संहिता-मानसोल्लास-शिवतत्त्वरत्नाकर-प्रभृतिषु सत्सु विश्व कोशेषु संस्कृतविश्वकोशो नास्तीति किमर्थं वक्तव्यम्'' इत्यादिका प्रचलति तेषां वचनवैखरी।

अग्निपुराण-गरुडपुराण-शिवतत्त्वरत्नाकराः प्राचीनानां ग्रन्थभागानां संकलनरूपाः। प्रत्यहं विश्क्कोषा ये आधुनिके विश्वस्मिन् निर्मीयन्ते तत्र सर्वत्र नवीनं लेखनं ; न पुनस्तत्तद्विषयकाणां पुरातनग्रन्थभागानां संकलनम्।

बृहत्संहिता-मानसोल्लासयोः केषाञ्चन तत्कर्तृज्ञातानां विषयाणामेकत्र समवायः।

कयाचिन्मात्रया विश्वकोशत्वधर्मवन्तौ ग्रन्थौ तारानाथ-प्रणीतवाचस्पत्य-राधाकान्तदेवप्रणीतशब्दकल्पद्रुमौ ; तयोः सतीष्वपि प्राचीनग्रन्थभागानामुद्धृतिषु , केषुचन वेदान्तन्यायादि-शास्त्रेषु कोषकर्तृभ्यामेव रचितानां लेखनानामुपलब्धेः।

सर्वात्मना आधुनिकविश्वकोशानुपमिन्वन् संस्कृतकोषस्तु 'लघुशब्दार्थसर्वस्वं' यत् परवस्तुवेङ्कटरङ्गाचार्येण प्रणीतम्। अस्मिन् विषयेऽधिकं विवरणं मदीयायाः ''संस्कृतवाङ्मये विश्वकोशाः'' इत्याख्यायाः कृतेरवगन्तव्यम्।

यद्यपि नवीनाः कथाः, महाकथाः, आधुनिक्या शैल्या रचिताः कविताः, हास्यबिन्दवः-इत्यादिका संपत् संस्कृतभाषायाः कोषागारे क्रमशो योज्यमानाऽक्षिलक्षीक्रियते। एष च कोषागारः संप्रति नातीव विस्तृतः।

एवंलक्षणः कोषागारो न केवलं भूमिष्ठः अपि तु ब्रह्माण्डव्यापी- इत्येतत् इङ्ग्लीष्राज्ये।

बिन्दुरपि यत्र न समग्रं सृष्टस्तत्र 'अस्माकं पूर्वजैः सष्टस्तु समुद्र एव, यत्र तिमिङ्गिलास्तरन्ति' इति हठेन सावेशं भाषणम्- इत्येतत् संस्कृतराज्ये।

पुनरधुना दृष्टिनिक्षेपं कुर्म इङ्ग्लीष्भाषासाम्राज्यवृद्धौ। कोऽपि वैदेशिकः इङ्ग्लीष्भाषया ग्रन्थान् रिरचयिषुः कर्णाटकं प्रविशति, तत्रत्यं चरित्रं जानाति, तद्विषयकं विस्तृतं विवरणं करोति,कन्नडभाषामभ्यस्यति,कन्नड्व्याकरणं रचयति, कन्नडशब्दा नामर्थम् इङ्ग्लीष्भाषया विवृण्वन्तं कोषं निर्माति, कन्नडभाषया विरचितान् मातृकागतान् ग्रन्थान् संपादयति, तेषु परिशिष्टांश्च योजयति। तेन विरचितान् तद्विषयकान् लेखान् ग्रन्थान् ग्रन्थ-भागांश्च तद्विषयकसंशोधनानि चिकीर्षवः स्वप्रबन्धेषूद्धरन्ति। कन्नडचरित्रं ज्ञातृणां जनानां सुविस्पष्टमेतत्-कमधिकृत्य मयेदमुच्यत इति। स धन्यजन्मा- किट्टेल्।

यद्यपि क्रैस्तपरम्परायाः प्रसारार्थं स चर्च्अधिकारिभि र्नियुक्तः। परन्तु स इत्थंभूतं कन्नडपाण्डित्यमासीदद् यत् कन्नड भाषाया अधिकृतं शब्दकोशं निरमात्। प्रायशः कोषकारा यं विषयमवगणयन्ति तमप्येष सूक्ष्मया दृशा सम्यगेवावैक्षत-स च, आभाणकाः। द्विसहस्राधिकान् कन्नडाभाणकान् स कोष रचनार्थम् समगृह्णात्।

यूरोपीया बहवः क्रैस्तमतप्रचारार्थं भारतीया भाषा अधीत्य तत्तद्भाषासु कोषव्याकरणादिग्रन्थान् मातृकास्थान् प्राचारयन्। परन्तु कदापि स्वभाषा न व्यस्मरन्। टिबेट्-जापान्-मङ्गोलिया-चीना-कोरिया-किर्घीजिया-मलय-प्रभृतिषु राष्ट्रेषु वर्तमानाः संस्कृतीरधिकृत्य आस्माका अपि बहवः कृतसंशोधनाः इत्यत्र न संशयः। परन्तु तेषु कति विद्वांसोऽविस्मृतसंस्कृताः संस्कृतभाषया तत्तद्भाषाकोशव्याकरणादिग्रन्थान् अग्रथन्निति मम प्रश्नः।

प्रत्यहं भारतीया यान्ति विदेशान्। दर्शनकुतूहलिनः प्रवासिनस्तेष्वधिकाः। ते किं स्वदृष्टान् देशानधिकृत्य लेखान् रचयन्ति ? तत्तद्भाषागतानि वैशिष्ट्यानि विषयीकृत्य ग्रन्थान् ग्रथ्नन्ति ? ग्रथितेष्वपि तँल्लक्षणेषु ग्रन्थेषु , विदेशीयाः स्वराष्ट्र विषयकाणि संशोधनानि चिकीर्षवः एतैर्विरचितान् ग्रन्थान् किमुद्धरन्ति ? स्वसंशोधनग्रन्थेषु प्रमाणत्वेनैतान् ग्रन्थान् नाम्ना किं कीर्तयन्ति ? ययाऽपि कयाऽपि भारतीयया भाषया विरचितः केवलमेकः कोऽपि संशोधनग्रन्थो नाम्ना उल्लिख्यतां यद्वाक्यानि अमेरिका-यूरोप्-प्रभृतिराष्ट्रेषु इङ्ग्लीष्-फ्रेञ्च्-प्रभृतिभाषाभि र्विरचतेषु संशोधनग्रन्थेषु प्रमाणत्वेनोद्धियन्ते।

अहं यदा मैसूरवीये प्राच्यविद्यासंशोधनालये कार्यनिरतः सन् मातृकाग्रन्थपाठेषु सकुतूहलान् विदेशीयान् साश्चर्यम् अपश्यम्। प्रकटितानामपि ग्रन्थानां मातृकापाठसंशोधनदृष्ट्या पुनः पुनरनुसंधानं विदेशीयानां विदुषामतीव सहजं कर्मेति मया ज्ञातम्।

कश्चन निहोन्(जपान्)देशीयः न्यायमञ्जर्या मातृका मपैक्षत। मयोक्तम्-'न्यायमञ्जरी प्रकटितपूर्वैव । प्राच्यविद्यासंशोधनालयेऽपि प्रकटिता'। स उवाच-'परन्तु ग्रन्थस्य पीठिकायां मातृकाया अङ्ग एव नोल्लिखितः'। तद्वचनं सत्यमासीत्!

को भारतीयो विद्वान् आङ्ग्लोस्याक्सन्-फ्रेञ्च् इत्यादि भाषाग्रन्थान् मातृकास्थानधिकृत्य समशोधयत् ? [अनुवर्तते...